# Shri Narmadalahari

# શ્રીનર્મદાલહરી

## Document Information

Text title : Shri Narmadalahari

File name : narmadAlaharI.itx

Category : devii, vAsudevAnanda-sarasvatI, devI, nadI, laharI

Location : doc_devii

Author : vAsudevAnandasarasvatI TembesvAmi

Description-comments : From stotrAdisangraha

Latest update : May 12, 2021

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

November 22, 2022

*sanskritdocuments.org*

# શ્રીનર્મદાલહરી

નર્મદે હરસમ્ભૂતે હરલિઙ્ગાર્ચનાદૃતે ।
હરલિઙ્ગાઞ્ચિતતટે જયાદ્યં નર્મદે હર ॥

નમઃ પ્રાતર્માતર્ગિરિશદુહિતર્નર્મદ ઉત ।
ક્ષપાયાં રેવે તે નમ ઇતમતે મેકલસુતે ॥

નમો નિત્યં સત્યં હિ ત ઉદકમત્યન્તકમકમ્ ।
હરત્યાધિં સા ત્વમખિલવિષહે મેઽર્પય સુખમ્ ॥ ૧॥

મહેશાઙ્ગોદ્ભૂતા સુરવરનરાણામભિમતા ।
યુતા સિદ્ધૈર્યાતા પ્રસભમિવ પાશ્ચાત્યજલધિમ્ ॥

વૃતા ભીમેનૈષા હૃતભજકદોષા વરવૃષા ।
સુભૂષા સદ્વેષા રુચિરવપુષા ભાત્યતિરુષા ॥ ૨॥

તટે યસ્યાસ્તપ્ત્વા તપ ઉપરિગૈર્દુશ્ચરમરમ્ ।
વરં હ્યત્રેઃ પત્ની પરમમનસૂયા ગતભયા ॥

સ્વપુત્રત્વેનૈવ ત્રિભુવનસમારાધ્યમભવમ્ ।
સમાપાસ્મદ્દૈવં ક ઇહ સરિતં તાં તુ ન નમેત્ ॥ ૩॥

પ્રયાન્તીં સિન્ધું યા પ્રતિહતગતિર્વિન્ધ્યપદતો ।
મહાવેગાઽભઙ્ગા સકલમલભઙ્ગા વરભગા ॥

નગાન્ભિત્વાનેકાનપિ વિવિધલોકાન્સ્વબલતઃ ।
પુનાતીયં રેવા જગતિ વરભાવાઽહૃતભવા ॥ ૪॥

પ્રસિદ્ધાઽઽસ્તે યસ્યાજનિરમરકણ્ઠેઽમરવૃતે ।
મતે નાભિઃ સિદ્ધેશ્વરપુર ઉતાસૌ ભૃગુપુરે ॥

પરે સિન્ધૌ લીના જગતિ મલિનાનાં સુમતિદા ।
સમુદ્ધર્ત્રી ભર્ત્રી નિજભજકલોકસ્ય ગતિદા ॥ ૫॥

સરસ્વત્યાઃ સત્યા જલમિહ પુનાતિ ત્રિદિનતઃ ।
સ્મ કાલિન્ધા નદ્યા અપિ ચ સલિલં સપ્તદિનતઃ ॥

મહાભઙ્ગા ગઙ્ગાખિલદુરિતભઙ્ગા સપદિ સા ।
મહાભાવા રેવા કથમપિ હિ દૃષ્ટ્યૈવ સહસા ॥ ૬॥

સ્વભાવાદાસિન્ધોરિયમચલજાભાસ્તિ સુલભા ।
ત્રિષુ સ્થાનેષ્વેષા હૃતમલિનદોષા ન સુલભા ॥

નગર્યામોઙ્કારાભિધપશુપતેરુત્તરગતિ-।
ર્યુતા વૌરાભિખ્યેઽપિ ચ ભૃગુમુનેઃ ક્ષેત્ર ઉશતિ ॥ ૭॥

પુનન્ત્યન્યા માન્યા અપિ જગતિ ગઙ્ગાદિસરિતઃ ।
પ્રયાગાદિસ્થાને મહતિ ન હિ સર્વત્ર દુરિતાત્ ॥

ઇયં રેવા દેવાધિપતિશિવસેવ્યોભયતટા ।
તટે યત્ર ક્વાપિ સ્વકમિહ પુનાત્યાજલનિધેઃ ॥ ૮॥

ત્રિશૂલાઙ્કાન્યચ્છાન્યગણિતવિમાનાનિ ત ઉપ-।
ર્યુપર્યસ્યાઃ કૂલં સુવિમલમુપાદાય સતતમ્ ॥

સ્થિતાઃ શમ્ભોર્દૂતા મૃતમિહ તુ નેતું શિવપુરમ્ ।
વરં તેષામુચ્ચૈરહમહમિકાશબ્દ ઉદિતઃ ॥ ૯॥

બહિઃશબ્દાત્તસ્માત્પ્રવિગલિતધૈર્યા યમભટાઃ ।
મૃતાન્નેતું પ્રાપ્તા અપિ સપદિ તે વેપિતહૃદઃ ॥

અધીરા ધીરા દ્રાક્ તત ઉત પરાવૃત્ય સજવાઃ ।
સ્વવાસં સઞ્જગ્મુઃ ખલુ તત ઇતઃ કો નરકભાક્ ॥ ૧૦॥

પ્રભાવોઽસ્યા મૃત્યુઞ્જયદુહિતુરેવં હિ સરિતો ।
યતોઽતોઽસૌ રેવા નૃમરણભવાન્તાસ્તિ વિદિતા ॥

ન તાં કઃ સેવેતાનુપદમૃતભીતિર્હતમતિઃ ।
સમાનાં તાપાનામપિ ચ દુરિતાનાં પ્રશમનીમ્ ॥ ૧૧॥

યદીયામ્બુસ્પૃષ્ટઃ સ્પૃશતિ ગતિયોગેન પવનો ।
મનોહૃદ્યં યં તં તમપિ સ પુનાતીતિ મહિમા ॥

પ્રતીતો યસ્યાઃ સા જગતિ ગતિદાઽસાવભયદા ।
સદા સક્તાન્યુક્તાન્કિમુત ભજતામુદ્ધરતિ નો ॥ ૧૨॥

યદીયં પાનીયં સદમૃતમયં ચિત્સુખમયમ્ ।
સુપેયં ચાયુષ્યં મતિદમુત વર્ચસ્યમભયમ્ ॥

યશસ્યં ચક્ષુષ્યં વિહિતવિજયં સ્વગ્ર્યમલયમ્ ।
સુભવ્યં સદ્દેયં સકલજગદારોગ્યવિજયમ્ ॥ ૧૩॥

સુરપ્રાર્થ્યં પથ્યં સ્વયમિહ ચ પૂજ્યં વિજયતે ।
જગન્માન્યં ધન્યં મલહૃદિહ લભ્યં તુ નિયતેઃ ॥

નિયોગાત્સા રેવા નૃભવદવદાવાર્તિશમની ।
મનીષીડ્યા પાયાદવિરતમપાયાદ્ધરધુની ॥ ૧૪॥

નિયમ્યાત્માનં યે વિહિતનિયમાઃ સન્તતપરિ-
ક્રમં કુર્વન્ત્યસ્યા અમલજલસેવૈકનિયમાઃ ॥

સુપૂતાસ્તે ધન્યા જગતિ બહુમાન્યાઃ પરગતિમ્ ।
વ્રજન્ત્યેવં રેવા જયતિ ખલુ શર્વાઙ્ગજનિતા ॥ ૧૫॥

અયે રેવે દેવેડિતગુણગણે મત્ર્યતરણે ।
ક્ષણેનાપિ સ્નાનાત્પરમગતિદાભીષ્ટવરદા ॥

ત્વમેવાતો દેવા અપિ તવ ન ચેચ્છન્તિ તવ તટમ્ ।
પરિત્યક્તું વક્તું તવ ગુણગણાન્કઃ પ્રભુરિહ ॥ ૧૬॥

યદીયે સત્તોયે હિમનગસુતાગર્ભગગણાધિપ્
આસ્યોત્કૃત્યારં શિર ઇહ સુરારિઃ સ્વહિતકૃત્ ॥

મહામાયાવી પ્રાક્ષિપદપભયોઽતક્ર્યમહિમે-
શ્વરસ્યાત્માચ્છીર્ષાદ્ધતરુધિરસંસ્પર્શવશતઃ ॥ ૧૭॥

તતોઽનન્તા આબ્ધેઃ સ્મરહરસુતાયાસ્તુ સલિલેઽ-
મલેઽનન્તા જાતા ઇહ રુધિરભાસઃ ખલુ શિલાઃ ॥

અભૂવન્ગાણેશા અખિલમલસઙ્ક્ષાલનપરા ।
વરાપૂજ્યા વિઘ્નક્ષપણપટવસ્તેઽપિ વરદાઃ ॥ ૧૮॥

યદીયે પાનીયે ભૃશમમૃતસંસ્પર્ધિજનનિ ।
ક્ષપાયાં તે ચોઙ્કારેશ્વરવરપુરાત્પૂર્વત ઉત ॥

મહોત્તુઙ્ગસ્થાનાત્પતિત ઉપલાસ્તે પશુપતે-

ર્ભવન્ત્યાહો બાણાભિધપરમલિઙ્ગાનિ બહુશઃ ॥ ૧૯॥

મહાન્તસ્તે બાણા અપિ પરમસૂક્ષ્માઃ કતિપયાઃ ।
શુભા કર્પૂરાભાઃ શશધરકલાઢ્યાઃ કતિપયાઃ ॥

પરે કેચિચ્ચિત્રા અપિ ચ નિખિલાસ્તેઽત્ર ભજનાત્ ।
ગજારેઃ સાયુજ્યં દદત ઇતિ રેવામ્બુમહિમા ॥ ૨૦॥

એવમ્પ્રભાવે જય દેવિ રેવે, પ્રસીદ મે તેઽમ્બુ સદૈવ સેવે ।
શ્રીનર્મદે દેવિ નમો નમસ્તે શ્રીશર્મદે સોમસુતે નમસ્તે ॥ ૨૧॥

અવતુ વિગતરોષાસ્માન્મહાસિન્ધુયોષા
પરિહૃતનતદોષા યા નમોમાત્રતોષા ।
જયતુ ભજકપોષા સા સ્રવન્તી વિશેષા
નિરુપમતમભૂષા માલિની દિવ્યવેષા ॥ ૨૨॥

સન્માનસસ્વચ્છસુદિવ્યનીરા
નીરાગયોગ્યાશ્રિતરમ્યતીરા ।
ધીરાર્ચિતા નિત્યમખણ્ડપૂરા
સા રાતુ રેવેષ્ટમનન્તસારા ॥ ૨૩॥

સ્વભક્તવરદે સુરદ્વિષદભેદ્યસદ્ધર્મદે ।
સુદુર્ગતિદકર્મદે હતગદેઽપિ સદ્ધર્મદે ॥

અયે નદિ ન દીનતાં વ્રજસિ કર્હિચિચ્છર્મદે ।
પ્રસીદ જનકામદે જય નમોઽસ્તુ તે નર્મદે ॥ ૨૪॥

યન્મૂલેસ્ત્યમરેશ્વરો વિજયતે શ્રીસિદ્ધનાથસ્તથા
કાવેરીપરિવેષ્ટિતો ગતિદ ઓઙ્કારોઽપરે ચામિતાઃ ।
મધ્યેઽન્યેઽપિ ચ શૂલપાણિસહિતાઃ પાશ્ચાત્યભાગે સ્થિતાઃ
સર્વે તે ભજતામભીષ્ટફલદા વર્વર્તિ સા નર્મદા ॥ ૨૫॥

(હારબન્ધઃ)
હરપરમરયે સમસ્તમઘં મમ
કુરુ ગુરુકરુણાં સમસ્તમતે મયિ ॥

ખલબલદલને સમસ્તમનોમલમ્ ।
હર દરમરમપ્યમત્ર્યમતેઽમલે ॥ ૨૬॥

યસ્ય સ્મૃત્યા ચ સદ્યઃ કલિમલવિલયો જાયતે ભાવુકાનામ્ ।
યત્સ્મૃત્યા સ્મર્તૃગામી ભવભયહૃદુપૈત્યાત્મદો ભાવુકાનામ્ ॥

દત્તાત્રેયસ્ય તસ્ય પ્રશમિતમનસઃ સદ્ગરીવર્તિ માતુઃ ।
સ્થાનં યસ્યાસ્તટે સા વિજયત ઉશતી નર્મદા શર્મદા નઃ ॥ ૨૭॥

(અલઙ્કારઃ)
કુષ્ટાદ્યાર્તોઽપ્યરોગો ભવતિ સદનસૂયાશ્યમે યત્તટે યન્ ।
મધ્યે શુક્લાદિતીર્થાન્યપિ ઝટિતિ પુનન્ત્યુદ્ધરત્યાશુ યા ચ ॥

પ્રેતશ્રાદ્ધેન નારાયણબલિત ઇતં દુર્ગતિં મુક્તિદાં તામ્ ।
રેવામસ્તૌદખેદાં પરમસુહિતદાં નર્મદાં વાસુદેવઃ ॥ ૧॥

(ગોમૂત્રિકાબન્ધ)
ભવાન્તકેઽભયં દેહિ તાપં મે હર નર્મદે ॥

ભવાત્મકે નયં દેહિ પાપં મે હર નર્મદે ॥

જય જય શિવકન્યે નર્મદે શર્મદે ત્વમ્ ।
જય જય જનમાન્યે ધર્મદેઽધર્મદે ત્વમ્ ॥

જય જય સુવદાન્યે ધર્મદે કર્મદે ત્વમ્ ।
જય જય ભુવિ ધન્યે ભર્મદે વર્મદે ત્વમ્ ॥

ઇતિ શ્રીવાસુદેવાનન્દસરસ્વતીવિરચિતા શ્રીનર્મદાલહરી સમ્પૂર્ણા ।

---

*Shri Narmadalahari*

pdf was typeset on November 22, 2022

Please send corrections to *sanskrit@cheerful.com*